സമഗ്ര ചോദ്യോത്തരങ്ങൾ

Chapter Name:काव्यमुक्तावलिः। *Marks :(1)*

Quest:

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

१ कविकुलगुरुः कः?

(कालिदासः, भासः, व्यासः, पाणिनिः)

२. कालिदासेन कति नाटकानि विरचितानि?

(त्रीणि, चत्वारि, पञ्च, षट्)

३ 'पार्श्वे' इत्यस्य अर्थः कः?

(दूरे, समीपे, मध्ये, अन्ते)

४ पार्श्वे पितुरधोमुखी। अत्र पितुः पार्श्वे स्थितवती का?

(पार्वती,सीता, दमयन्ती, द्रौपदी)

५ पार्श्वे पितुरधोमुखी। अत्र सूचितः पिता कः?

(दशरथः,द्रुपदः, विदर्भराजः, हिमवान्)

६ पार्वती किं गणयामास ?

( कुमुदपत्राणि, कदम्बपत्राणि, तालपत्राणि, लीलाकमलपत्राणि)

७ लीलाकमलपत्राणि गणयामास। का गणयामास?

(सीता, द्रौपदी, पार्वती, दमयन्ती)

८ पार्वती कदा लीलाकमलपत्राणि गणयामास?

(ब्रह्मर्षौ वादिनि, देवर्षौ वादिनि, महर्षौ वादिनि, सप्तर्षौ वादिनि)

९ रामः कीदृशीं सीतां परित्यक्तुं निश्चिकाय?

(प्रसूताम्, आसन्नप्रसूताम्, कन्याम्, अन्तर्वत्नीम्)

१० रामः केन कारणेन सीतां परित्यक्तुं निश्चिकाय?

(पितुराज्ञापालनाय, लोकापवादभिया,इच्छापूरणाय, तपश्चरणाय )

११ स राजा केन वाच्यः?

(सुमन्त्रेण, भरतेन, लक्ष्मणेन, गुरुणा)

१२ राजा रामः कस्मात् वाच्यः?

(गुरुवचनात्, सीताचनात्, पितृवचनात्, लक्ष्मणवचनात्)

१३ वाच्यस्त्वया मद्वचनात् स राजा- राजा कः?

(विभीषणः, श्रीरामः, भरतः, शत्रुघ्नः)

१४ मां लोकवादश्रवणाद् ------------------------ ।

(अयासि, जहासीः अहासीः, विधासि )

१५ -------------------- अर्थगौरवम्।

( भारवेः, कालिदासस्य, दण्डिनः माघस्य)

१६ उपमा कालिदासस्य भारवेः -------------------- ।

( अर्थगौरवम्, पदलालित्यम्, गुणत्रयम्, अलङ्कारवैभवम्)

१७ ------------------- कालिदासस्य भारवेः अर्थगौरवम्, ।

( अर्थगौरवम्, गुणत्रयम्, पदलालित्यम्, उपमा)

१८ रघुवंशमहाकाव्ये कस्य वंशस्य चरितम् उपवर्णितम्?

(चन्द्रवंशस्य, सूर्यवंशस्य, मूषकवंशस्य, गुप्तवंशस्य)

१९. 'वह्नौ' इत्यस्य विभक्तिः का?

(चतुर्थी, पञ्चमी, षष्ठी, सप्तमी)

२० पञ्चमहाकाव्येषु अर्थगौरवेण व्यतिरिक्तं महाकाव्यं किम्?

(कुमारसंभवम्, रघुवंशम्, किरातार्जुनीयम्, माघम्)

२१ 'माघम्' इति कस्य महाकाव्यस्य नामान्तरं भवति?

(रघुवंशस्य, नैषधीयचरितस्य, किरातार्जुनीयस्य, शिशुपालवधस्य)

२२. शिशुपालवधे कति सर्गाः सन्ति?

(दश, विंशतिः, पञ्चविंशतिः त्रिंशत्)

२३ किरातार्जुनीयस्य कर्ता कः?

( कालिदासः, श्रीहर्षः, भारविः, माघः)

२४ नैषधीयचरितमहाकाव्यस्य कर्ता कः?

(श्रीहर्षः, कालिदासः, माघः, भारविः)

२५ निषधाधिपः कः ?

(दिलीपः, श्रीरामः, नलः, शिशुपालः)

२६ किरातार्जुनीये महाकाव्ये कति सर्गास्सन्ति ?

( अष्टादश, अष्ट, अष्टाविंशतिः, अष्टत्रिंशत्)

२७ माघमहाकाव्यस्य नामान्तरं किम्?

( नैषधम्, किरातार्जुनीयम्, शिशुपालवधम्, मेघदूतम्)

२८ मां लोकवादश्रवणाद् अहासीः। अत्र कर्ता कः?

(सः ,ते, त्वम् अहम् )

२९ बलात्कारेण इति अर्थयुक्तं पदम्

(साहसम्, रासभम्, प्रसभम्, साध्वसम्)

३० मुमोच इत्यत्र लकारः कः?

(लट्, लिट्, लुट्, लोट्)

३१ मयापि देयं प्रतिवाचिकं न ते- कस्याः वचनमिदम्?

(सीतायाः, द्रौपद्याः, दमयन्त्याः, पार्वत्याः)

३२ विचित्ररूपा खलु चित्तवृत्तयः।कस्याः वचनमिदम्?

(सीतायाः, द्रौपद्याः, दमयन्त्याः, पार्वत्याः)

३३ रुजन्ति चेतः प्रसभं ममाधयः।कस्याः वचनमिदम्?

(सीतायाः, द्रौपद्याः, दमयन्त्याः, पार्वत्याः)

३४ श्रुतस्य किं तत्सदृशं कुलस्य। कस्याः वचनमिदम्?

(सीतायाः, द्रौपद्याः, दमयन्त्याः, पार्वत्याः)

३५ श्रुतस्य किं तत्सदृशं कुलस्य। अत्र कस्य कुलं विवक्षितमस्ति?

(नलस्य, युधिष्ठिरस्य, शिशुपालस्य, श्रीरामस्य)

३६ कीदृशी पार्वती लीलाकमलपत्राणि गणयामास?

(ऊर्ध्वमुखी, तिर्यङ्मुखी, अधोमुखी)

३७ ---------- विद्वदौषधम् भवति ।

(रघुवंशम् , माघम् , नैषधम् , कुमारसंभवम् )

३८ चेदिराजः कः ?

(शिशुपालः , नलः , लक्ष्मणः , दुर्योधनः )

३९ रघुवंशं कस्मिन् काव्यविभागे अन्तर्भवति ?

(खण्डकाव्ये , महाकाव्ये , स्तोत्रकाव्ये , सन्देशकाव्ये )

४० पञ्चमहाकाव्येषु कस्मिन् महाकाव्ये सीतापरित्यागकथा वर्णिता ?

(रघुवंशे , नैषधीयचरिते , कुमारसम्भवे , शिशुपालवधे )

४१ अर्थगौरवेण प्रसिद्धं महाकाव्यं किम् ?

(शिशुपालवधम् , नैषधीयचरितम् , किरातार्जुनीयम्, कुमारसंभवम् )

४२ नैषधीयचरिते महाकाव्ये नायिका का ?

(पार्वती , दमयन्ती , शकुन्तला , द्रौपदी )

४३ भारविः केन प्रसिद्धः भवति ?

( उपमाप्रयोगेण , पदलालित्येन , अर्थगौरवेण , प्रौढपदप्रयोगेण )

**Hint:**

**उत्तराणि**

१ कालिदासः ।

२. त्रीणि।

३ समीपे ।

४ पार्वती

५ हिमवान् ।

६ लीलाकमलपत्राणि।

७ पार्वती।

८ देवर्षौ वादिनि।

९ अन्तर्वत्नीम् ।

१० लोकापवादभिया ।

११ भरतेन

१२ सीतावचनात्।

१३ श्रीरामः ।

१४ अहासीः।

१५ भारवेः।

१६ अर्थगौरवम् ।

१७ उपमा ।

१८ सूर्यवंशस्य ।

१९ सप्तमी।

२० किरातार्जुनीयम् ।

२१. शिशुपालवधस्य ।

२२ विंशतिः ।

२३ भारविः।

२४ श्रीहर्षः ।

२५ नलः ।

२६ अष्टादश ।

३१ दमयन्त्याः।

३२ द्रौपद्याः ।

३३ द्रौपद्याः ।

३४ सीतायाः।

३५ श्रीरामस्य।

३६ अधोमुखी ।

३७ नैषधम्।

३८ शिशुपालः ।

३९ महाकाव्ये ।

४० रघुवंशे।

४१ किरातार्जुनीयम्।

४२ दमयन्ती ।

४३ अर्थगौरवेण।

**Chapter Name:काव्यमुक्तावलिः।** *Marks :(1)*

**Quest:**

**उदाहरणानुसारं लिखत।**

**क) उदा- पितुः + अधोमुखी- पितुरधोमुखी।**

कृतिः + एव - ---------।

उक्तिः + इयं - ---------।

हेतुः + अभूत् - ---------।

**ख)उदा- वाच्यः + त्वया - वाच्यस्त्वया।**

वाच्यः + तु - ----------।

नमः + ते - ----------।

कुतः + ते - ----------।

**ग)उदा- अवसन्नभुजान्न - अवसन्नभुजात् + न।**

तस्मान्न - ---------- + ---------।

एततन्न - ----------- +-----------।

तन्न - ----------- + ----------।

**घ)उदा - गलद् + विवेद - गलद्विवेद।**

तस्माद् + वा - ---------।

एतद् + विचार्य - --------।

तद् + विलोपं - --------।

**ङ)उदा- मयापि - मया + अपि।**

ममापि - ----- + -----।

कदापि - ----- +-----।

तथापि - -----+ ------।

**Hint:**

**क)उत्तराणि**

कृतिरेव

उक्तिरियम्

हेतुरभूत्

**ख)उत्तराणि**

वाच्यस्तु

नमस्ते

कुतस्ते

**ग)उत्तराणि**

तस्मात् + न

एततत् + न

तत् + न

घ)**उत्तराणि**

तस्माद्वा

एतद्विचार्य

तद्विलोपं

ङ)

**उत्तराणि**

मम + अपि

कदा + अपि

तथा + अपि

**Chapter Name:काव्यमुक्तावलिः।** *Marks :(1)*

**Quest:**

**समस्तपदं लिखत।**

**क)उदा- अधः मुखं यस्याः सा - अधोमुखी।**

ऊर्ध्वं मुखं यस्याः सा - ---------।

निम्नं मुखं यस्याः सा - --------।

नम्रं मुखं यस्याः सा - --------।

**ख)उदा- देवर्षिः - देवः च ऋषिः च।**

------ - सप्त च असौ ऋषिः च।

**------** - ब्रह्म च असौ ऋषिः च।

**---------** राजा च असौ ऋषिः।

**4 एकपदं लिखत ।**

**पर्वतस्य अपत्यं स्त्री - पार्वती ।**

जनकस्य अपत्यं स्त्री - --------।

**देवः च असौ ऋषिः च - देवर्षिः ।**

महान् च असौ ऋषिः च - --------।

**विलासो अस्याः अस्तीति - विलासिनी ।**

सुहासो अस्याः अस्तीति - --------।

Hint:

**क )उत्तराणि**

ऊर्ध्वमुखी।

निम्नमुखी।

नम्रमुखी।

ख)**उत्तराणि**

सप्तर्षिः

ब्रह्मर्षिः

राजर्षिः

4)**उत्तराणि**

जानकी

महर्षिः

सुहासिनी

**Chapter Name:काव्यमुक्तावलिः।** *Marks :(1)*

**Quest:**

**यथोचितं योजयत ।**

**क)** कविकुलगुरुः - हिमालयः

दिलीपः - भारविः

गिरीशः - कालिदासः

अर्थगौरवम् - माघम्

शिशुपालवधम् - सूर्यवंशप्रसूतः

**ख)** समक्षम् - श्रीहर्षविरचितम्

जनकः - ल्यबन्तमव्ययम्

निरुह्य - अक्ष्णोः समीपम्

नैषधीयचरितम् - अग्निः

वह्निः - पिता

**ग)** पार्वती - न देयं

सीता - दयितजयमङ्गलैषिणी

चित्तवृत्तयः - अहासीः

विलासिनी - गणयामास

प्रतिवाचिकं - वह्नौ विशुद्धा

- विचित्ररूपाः

**घ)** कालिदासः - नैषधीयचरितम्

भारविः - शिशुपालवधम्

श्रीहर्षः - कुमारसम्भवम्

माघः - किरातारजुनीयम्

**Hint:**

**क)**

कविकुलगुरुः - कालिदासः

दिलीपः - सूर्यवंशप्रसूतः

गिरीशः - हिमालयः

अर्थगौरवम् - भारविः

शिशुपालवधम् - माघम्

**ख)** समक्षम् - अक्ष्णोः समीपम्

जनकः - पिता

निरुह्य - ल्यबन्तमव्ययम्

नैषधीयचरितम् - श्रीहर्षविरचितम्

वह्निः - अग्नि

**ग)** पार्वती -गणयामास

सीता -वह्नौ विशुद्धा

चित्तवृत्तयः -विचित्ररूपाः अहासीः

विलासिनी -दयितजयमङ्गलैषिणी

प्रतिवाचिकं -न देयं

Answer

**घ**) कालिदासः -कुमारसम्भवम्

भारविः -किरातारजुनीयम्

श्रीहर्षः -नैषधीयचरितम्

माघः -शिशुपालवधम्

Chapter Name:काव्यमुक्तावलिः। *Marks :(1)*

Quest:

**क) पञ्चमहाकाव्यानां तथा तेषां कर्तॄणां च नामानि यथोचितं योजयत ।**

| **महाकाव्यानि** | **कर्त्तारः** |
|---|---|
| किरातार्जुनीयम् | कालिदासः |
| शिशुपालवधम् | श्रीहर्षः |
| कुमारसंभवम् | भारविः |
| नैषधीयचरितम् | माघः |
| रघुवंरघुवंशम्। | कुमारदासः |

**ख)पट्टिकां पूरयत ।**

| **कृतिः** | **विभागः** | **कर्त्ता** |
|---|---|---|
| कुमारसम्भवम् | महाकाव्यम् | ----- |
| ----- | इतिहासः | व्यासः |
| शिशुपालवधम् | ----- | माघः |

Hint:

**<u>महाकाव्यानि</u>**

**<u>कर्त्तारः</u>**

किरातार्जुनीयम्
भारविः

शिशुपालवधम्
माघः

कुमारसंभवम्
कालिदासः

नैषधीयचरितम्
श्रीहर्षः

रघुवंशम्।
कालिदासः।

**ख)पट्टिकां पूरयत ।**

| **कृतिः** | **विभागः** | **कर्त्ता** |
|---|---|---|
| कुमारसम्भवम् | महाकाव्यम् | **<u>कालिदासः।</u>** |
| **<u>महाभारतम्।</u>** | इतिहासः | व्यासः |
| शिशुपालवधम् | **<u>महाकाव्यम्</u>** | माघः |

Chapter Name:काव्यमुक्तावलिः।  *Marks :(1)*

Quest:

**अधः निर्दिष्टाः आशयाः कस्मिन् काव्ये अन्तर्भवति इति लिखत ।**

कुमारसंभवे, नैषधीयचरिते रघुवंशे,
किरातार्जुनीये, शिशुपालवधे

क) स्वविवाहवार्ता श्रुत्वा पुत्री लज्जावनतमुखी सञ्जाता ।

—-----------------------------------------------------------------------------
----------------------

ख) लोकापवादभयेन कृतः परित्यागः भवतः कुलस्य धर्मस्य च उचितः वा

—-----------------------------------------------------------------------------
----------------------

ग) पराजयः भवतः प्रतीकाराय न प्रवर्तते , किन्तु मां बहुधा व्यथयति।

—-----------------------------------------------------------------------------
----------------------

घ) युद्धाय प्रस्थितं प्रियतमं धीरमनसा प्रेषयामास ।

—-----------------------------------------------------------------------------
----------------------

ङ) अज्ञातकुलशीलैः सह भाषणं कुलस्त्रीणां नोचितम् ।

—-----------------------------------------------------------------------------
----------------------

Hint:

**उत्तराणि**

क) कुमारसंभवे।

ख) रघुवंशे।

ग) किरातार्जुनीये।

घ)शिशुपालवधे।

ङ)नैषधीयचरिते।

**Chapter Name:काव्यमुक्तावलिः।** *Marks :(2)*

**Quest:**

**निर्दिष्टाशययुक्तं श्लोकं चित्वा लिखत ।**

**क) लज्जावनतमुखी पार्वती जनकस्य समीपम् अवर्त्तत ।**

१) एवं वादिनि देवर्षौ
पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि
गणयामास पार्वती ।।

२) वाच्यस्त्वया मद्वचनात् स राजा
वह्नौ विशुद्धामपि यत्समक्षम् ।
मां लोकवादश्रवणादहासीः
श्रुतस्य किं तत्सदृशं कुलस्य ।।

**ख) पौरापवादश्रवणभयात् माम् अत्यजः ।**

१) इमामहं वेद न तावकीं धियं
विचित्ररूपा खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः ।।

२) वाच्यस्त्वया मद्वचनात् स राजा

वह्नौ विशुद्धामपि यत्समक्षम् ।

मां लोकवादश्रवणादहासीः

श्रुतस्य किं तत्सदृशं कुलस्य ।।

**ग) प्रत्येकं मानवस्य मनोगतयः भिन्ना एव ।**

१) इमामहं वेद न तावकीं धियं

विचित्ररूपा खलु चित्तवृत्तयः ।

विचिन्तयन्त्या भवदापदं परां

रुजन्ति चेतः प्रसभं ममाधयः ।।

५) मयापि देयं प्रतिवाचिकं न ते

स्वनाम मत्कर्णसुधामकुर्वते ।

परेण पुंसा हि ममापि सङ्कथा

कुलाबलाचारसहासनासहा ।।

**घ) भर्तुः विजयाभिलाषिणी भार्या अश्रूणि न मोचयामास ।**

१) इमामहं वेद न तावकीं धियं

विचित्ररूपा खलु चित्तवृत्तयः ।

विचिन्तयन्त्या भवदापदं परां

रुजन्ति चेतः प्रसभं ममाधयः ।।

२) न मुमोच लोचनजलानि

दयितजयमङ्गलैषिणी ।

यातमवनिमवसन्नभुजा-

न्न गलद्विवेद वलयं विलासिनी।।

**ङ) अज्ञातकुलशीलैः सह भाषणं कुलस्त्रीणां नोचितम्।**

१) वाच्यस्त्वया मद्वचनात् स राजा

वह्नौ विशुद्धामपि यत्समक्षम् ।

मां लोकवादश्रवणादहासीः

श्रुतस्य किं तत्सदृशं कुलस्य ।।

२) मयापि देयं प्रतिवाचिकं न ते

स्वनाम मत्कर्णसुधामकुर्वते ।

परेण पुंसा हि ममापि सङ्कथा

कुलाबलाचारसहासनासहा ।।

**Hint:**

**8 .उत्तरम्-**

क)१) एवं वादिनि देवर्षौ

पार्श्वे पितुरधोमुखी ।

लीलाकमलपत्राणि

गणयामास पार्वती ।।

**उत्तरम्**

ख) २) न मुमोच लोचनजलानि

दयितजयमङ्गलैषिणी ।

यातमवनिमवसन्नभुजा-

न्न गलद्विवेद वलयं विलासिनी।।

**उत्तरम्-**

ग२) वाच्यस्त्वया मद्वचनात् स राजा

वह्नौ विशुद्धामपि यत्समक्षम् ।

मां लोकवादश्रवणादहासीः

श्रुतस्य किं तत्सदृशं कुलस्य ।।

**उत्तरम्**

घ१) इमामहं वेद न तावकीं धियं

विचित्ररूपा खलु चित्तवृत्तयः ।

विचिन्तयन्त्या भवदापदं परां

रुजन्ति चेतः प्रसभं ममाधयः।।

ङ) **उत्तरम्**

२) मयापि देयं प्रतिवाचिकं न ते

स्वनाम मत्कर्णसुधामकुर्वते ।

परेण पुंसा हि ममापि सङ्कथा

कुलाबलाचारसहासनासहा ।।

Chapter Name:काव्यमुक्तावलिः। *Marks :(2)*

Quest:

**श्लोकं पठित्वा उचितमाशयं चित्वा लिखत ।**

**क)** इमामहं वेद न तावकीं धियं

विचित्ररूपा खलु चित्तवृत्तयः ।

विचिन्तयन्त्या भवदापदं परां

रुजन्ति चेतः प्रसभं ममाधयः ।।

१. राष्ट्रसेवायै स्वभर्त्तारं सधैर्यं प्रेषयति ।

२. पराजयः मां व्यथयति ।

३. स्वविवाहवार्तां श्रुत्वा लज्जामनुभवति।

**ख)** मयापि देयं प्रतिवाचिकं न ते

स्वनाम मत्कर्णसुधामकुर्वते ।

परेण पुंसा हि ममापि सङ्कथा

कुलाबलाचारसहासनासहा ।।

१. राष्ट्रसेवायै भर्तारं प्रेषयति।

२. अपरिचितेन भाषितुं नोत्सहे।

३. सप्तर्षीणां वचनं श्रद्धया श्रुणोति।

Hint:

**क)उत्तरम्**

२. पराजयः मां व्यथयति।

**ख)उत्तरम्**

२. अपरिचितेन भाषितुं नोत्सहे।

Chapter Name:काव्यमुक्तावलिः। *Marks :(3)*

Quest:

**श्लोकं पठित्वा सूचनाश्च उपयुज्य श्लोकस्याशयं लिखत ।**

१ न मुमोच लोचनजलानि

दयितजयमङ्गलैषिणी ।

यातमवनिमवसन्नभुजा-

न्न गलद्विवेद वलयं विलासिनी ।।

सूचनाः- भर्तुः विजयाभिलाषिणी ———— नामुञ्चत् । विषादेन अवसन्नहस्तात् ——— भूतलं पतितम् इति —— ।

२) एवं वादिनि देवर्षौ

पार्श्वे पितुरधोमुखी ।

लीलाकमलपत्राणि

गणयामास पार्वती ।।

सूचनाः-सप्तर्षीणामागमनम्- पार्श्वस्था पार्वती- विवाहवार्ता-लज्जावनत मुखी-लीलाकमलपत्रगणना।

३) वाच्यस्त्वया मद्वचनात् स राजा

वह्नौ विशुद्धामपि यत्समक्षम् ।

मां लोकवादश्रवणादहासीः

श्रुतस्य किं तत्सदृशं कुलस्य ।।

सूचनाः-रघुवंशम्- चतुर्दशसर्गः- सीतापरित्यागः- अग्निशुद्धिः-लोकापवादः- परित्यागः—- औचित्यम्।

४) इमामहं वेद न तावकीं धियं

विचित्ररूपा खलु चित्तवृत्तयः ।

विचिन्तयन्त्या भवदापदं परां

रुजन्ति चेतः प्रसभं ममाधयः ।।

सूचनाः-महाभारतम्- भारविः- वनवासः- चित्तवृत्तिनिरूपणम्- आधय- रुजन्ति।

५) मयापि देयं प्रतिवाचिकं न ते

स्वनाम मत्कर्णसुधामकुर्वते ।

परेण पुंसा हि ममापि सङ्कथा

कुलाबलाचारसहासनासहा ।।

सूचनाः- नैषधीयचरितम्- नलस्यागमनम्- कुशलप्रश्नः- दूतसमुदाचारः- अपरिचितानां सहोपवेशनम्- कुलाङ्गनाः।

**Hint:**

**आदर्श उत्तरम्**

1) श्रीकृष्णशिशुपालयोः युद्धे शिशुपालस्य साहाय्यार्थं प्रस्थितस्य कस्यचन राजभटस्य भार्या धीरवनिता इव स्वभर्ता यात्रानुमतिं दत्तवती । भर्ता युद्धाय गच्छति इति सा उत्कण्ठां न प्रकटयामास।

2) पार्वती स्व पिता हिमवता साकं देवर्षिभिः कृतां तस्याः विवाहचर्चां श्रोतुमुत्सुका भूत्वा पितुः पार्श्वे लज्जावनतमुखी सती कमलदलगणनाव्ययाजेन स्थिता।

3) रामस्य पुरतः एव अग्निपरीक्षया आत्मनः परिशुद्धिं स्थापितवतीं सीतां केवलापवादभयेन रामः परित्यक्तवान् । एतत् तस्य धर्मबोधस्य विख्यातस्य कुलस्य च युज्यते वा इति स राजात्वया पृष्टव्यः इति सीता लक्ष्मणं वदति।

4) दुर्योधनादिभिः कौरवैः पराजितो अपि युधिष्ठिरः प्रतीकाराय न प्रवर्तते। तत्र पाञ्चाली कारणम् एवम् अनुमति, यत् प्रत्येकस्य मानवस्य मनोगतयः भिन्ना इति तथापि पाण्डवानां व्यसनं धर्मपत्नीं द्रौपदीमपि अतितरां व्यथयति।

5) आगतस्य नामादिकं न वदति चेत् तेन कृतानां प्रश्नानामुत्तराण्यपि न दातव्यानि। यतो हि कुलाङ्गना अपरिचितेन पुरुषेण समं सहवासं सम्भाषणं च न कर्तुं न इच्छन्ति।

अज्ञानकुलशीलैः परपुरुषैः सह एकान्ते वासः भाषणं च कुलस्त्रीणाम् उचितं न भवति इति तात्पर्यार्थः।

**मूल्यनिर्णयसूचकाः**

* आशयग्रहणाय -1
* उचितलेखनाय -1

**Chapter Name:काव्यमुक्तावलिः।** *Marks :(1)*

**Quest:**

**प्रदत्तान् प्रयोगान्  कर्त्तरि कर्मणि इति क्रमेण पट्टिकायां योजयतु ।**

क) राधिकया नृत्तम् आचरितम् ।

ख) बालैः क्रीडाङ्कणं गम्यते ।

ग) पार्वती लीलाकमलपत्राणि गणयति ।

घ) नलेन हंसः दमयन्तीसन्निधिं प्रेष्यते ।

ङ) माता पुत्रं वदति।

च) जनाः प्रतिदिनं वार्त्तापत्रं पठन्ति।

**Hint:**

| **कर्त्तरि** | **कर्मणि** |
|---|---|
| ग) पार्वती लीलाकमलपत्राणि गणयति । | क) राधिकया नृत्तम् आचरितम् । |
| ङ) माता पुत्रं वदति। | ख) बालैः क्रीडाङ्कणं गम्यते । |

च) जनाः प्रतिदिनं वार्त्तापत्रं पठन्ति

घ) नलेन हंसः दमयन्तीसन्निधिं प्रेष्यते ।

Chapter Name:काव्यमुक्तावलिः। *Marks :(4)*

Quest:

**क) सूचनाः उपयुज्य लघुटिप्पणीं लिखत ।**

(सूचनाः - संस्कृतसाहित्यम् ——— काव्यानि ——— पञ्चमहाकाव्यानि ——— कवयः — सहृदयाह्लादप्रदायकानि।)

Hint:

**आदर्श उत्तरम् ।**

**<u>पञ्चमहाकाव्यानि</u>**

काव्यं दृश्य श्रव्य भेदेन द्विविधं भवति। तेषु संस्कृतश्रव्यकाव्येषु प्रसिद्धं भवति पञ्चमहाकाव्यानि। ते रघुवंशम्, कुमारसम्भवम्, किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितम् च भवति । रघुवंशं कुमारसम्भवं च कविकुलगुरुः कालिदासेन विरचितं भवति। किरातार्जुनीयं भारविणा विरचितं भवति। शिशुपालवधं माघेन विरचितं भवति । अतः शिशुपालवधं माघमिति नाम्नापि प्रसिद्धं भवति। नैषधीयचरितं श्रीहर्षेणविरचितं भवति । एतानि पञ्चमहाकाव्यानि संस्कृतसाहित्यक्षेत्रे सहृदयाह्लादप्रदायकानि भवन्ति।

**मूल्यनिर्णयसूचका:**

* आशयग्रहणाय -1

* उचितलेखनाय -२

* भाषाशुद्धये -१

Chapter Name:काव्यमुक्तावलिः। *Marks :(5)*

Quest:

**अधोदत्तां खण्डिकां प्रादेशिकभाषया लिखत(अनुवदत)।**

बहिराकाशयात्रिकेषु प्रथमवनिता आसीत् **कल्पना चौला**। सा १९६२ मार्च् मासस्य १७ दिनाङ्के हरियानाराज्ये कर्णाल् ग्रामे जनिम् अलभत। वैमानिक विज्ञानमण्डले तस्याः उपरिपठनानन्तरमेव तस्मिन् विषये स्त्रियः आकृष्टाः आसन्। कल्पना चौलायाः साहसिकजीवितं सर्वेषां प्रचोदनप्रदमेव भवति ।

Hint:

**<u>आदर्श उत्तरम्</u>**

ബഹിരാകാശയാത്രികരില് ആദ്യ വനിതയാണ് കല്പനാചൌള . അവര് 1932 മാര്ച്ച് മാസം 17ാം തിയതി ഹരിയാനയിലെ കര്ണാല് ഗ്രാമത്തില് ജനിച്ചു.വൈഞ്ജാനികമണ്ഡലത്തില് അവരടെ ഉപരിപഠനത്തിന് ശേഷമാണ് ഈ വിഷയത്തില് സ്ത്രീകള് ആകൃഷ്ടരായിതുടങ്ങിയത്. കല്പനാചൌളയുടെ സാഹസികജീവിതം എല്ലാവര്ക്കും പ്രജോദനം തരുന്നതാണ്.

आशयगारहणाय-२

भाषाशुद्धये -२

सर्गात्मकता -१

Chapter Name:काव्यमुक्तावलिः। *Marks :(2)*

Quest:

**अधोदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

मणिप्पूर् राज्ये लब्धजन्मा **एम् सि मेरी कोम्** लोकप्रसिद्धा मल्लक्रीडालुः (Boxer ) भवति । ओलिम्बिक्स् स्पर्धायां मल्लक्रीडाविभागे रजतपतकं प्राप्ता प्रथमवनिता चेयं महाभागा । कर्षकदम्पत्योः पुत्रीयं वनिता इच्छाशक्त्या कठिनप्रयत्नैः च ईदृशमौन्नत्यं सम्पादितवती । प्रसिद्धस्य मल्लक्रीडालोः डिङ्कोसिंहस्य विजयेन प्रचोदिता इयं पद्मभूषण् , राजीव् गान्धी खेल् रत्ना , पद्मश्री, अर्जुनपुरस्कारः इत्यादिभिः सम्मानिता वर्त्तते ।

प्रश्नाः

१) एम् सि मेरी कोम् कस्य विजयेन प्रचोदिता आसीत् ?

२) एम् सि मेरी कोम् कथम् औन्नत्यं सम्पादितवती ?

३) एम् सि मेरी कोम् कुत्र जनिमलभत ?

४) एम् सि मेरी कोम् महाभागायै राष्ट्रेण सम्मानिताः पुरस्काराः के ?

**Hint:**

१) एम् सि मेरी कोम् प्रसिद्धस्य मल्लक्रीडालोः डिङ्कोसिंहस्य विजयेन प्रचोदिता आसीत् ।

२) एम् सि मेरी कोम्  इच्छाशक्त्या कठिनप्रयत्नैः च औन्नत्यं सम्पादितवती ।

३) एम् सि मेरी कोम् मणिप्पूर् राज्ये जनिमलभत ।

४) एम् सि मेरी कोम् महाभागायै राष्ट्रेण सम्मानिताः पुरस्काराः पद्मभूषण् , राजीव् गान्धी खेल् रत्ना , पद्मश्री, अर्जुनपुरस्कारः इत्यादिभिः भवन्ति।

**उचितमुत्तर लेखनाय २**